श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रिनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिनवतितमः सर्गः ॥

## श्रीरामेण राक्षससेनायाः संहारः

स प्रविश्य सभां राजा दीनः परमदुःखितः।
निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् ॥ **6.93.1** ॥

अब्रवीच्च स तान् सर्वान् बलमुख्यान् महाबलः।
रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्शितः ॥ **6.93.2** ॥

सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः।
निर्यान्तु रथसङ्घैश्च पादातैश्चोपशोभिताः ॥ **6.93.3** ॥

एकं रामं परिक्षिप्य समरे हन्तुमर्हथ।
वर्षन्तः शरवर्षाणि प्रावृट्काल इवाम्बुदाः ॥ **6.93.4** ॥

अथवाहं शरैस्तीक्ष्णैर्भिन्नगात्रं महाहवे।
भवद्भिःश्वो निहन्तास्मि रामं लोकस्य पश्यतः ॥ **6.93.5** ॥

इत्येतद् वाक्यमादाय राक्षसेन्द्रस्य राक्षसाः।
निर्ययुस्ते रथैः शीघ्रैर्नानानीकैश्च संयुताः ॥ **6.93.6** ॥

परिघान् पट्टिशांश्चैव शरखड्गपरश्वधान्।
शरीरान्तकरान् सर्वे चिक्षिपुर्वानरान् प्रति ॥ **6.93.7** ॥

वानराश्च द्रुमाञ्छैलान् राक्षसान् प्रति चिक्षिपुः।
स सङ्ग्रामो महाभीमः सूर्यस्योदयनं प्रति ॥ **6.93.8** ॥

रक्षसां वानराणां च तुमुलः समपद्यत।
ते गदाभिश्च चित्राभिः प्रासैः खड्गैः परश्वधैः ॥ **6.93.9** ॥

अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः।
एवं प्रवृत्ते सङ्ग्रामे ह्यद्भुतं सुमहद्रजः ॥ **6.93.10** ॥

रक्षसां वानराणां च शान्तं शोणितविस्रवैः।
मातङ्गरथकूलाश्च शरमत्स्या ध्वजद्रुमाः ॥ **6.93.11** ॥

शरीरसङ्घाटवहाः प्रसस्रुः शोणितापगाः।
ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः ॥ **6.93.12** ॥

ध्वजवर्मरथानश्वान् नानाप्रहरणानि च।
आप्लुत्याप्लुत्य समरे वानरेन्द्रा बभञ्जिरे ॥ **6.93.13** ॥

केशान् कर्णललाटं च नासिकाश्च प्लवङ्गमाः।
रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि व्यकर्तयन् ॥ **6.93.14** ॥

एकैकं राक्षसं सङ्ख्ये शतं वानरपुङ्गवाः।
अभ्यधावन्त फलिनं वृक्षं शकुनयो यथा ॥ **6.93.15** ॥

तदा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः।
निर्जघ्नुर्वानरान् घोरान् राक्षसाः पर्वतोपमाः ॥ **6.93.16** ॥

राक्षसैर्वध्यमानानां वानराणां महाचमूः।
शरण्यं शरणं याता रामं दशरथात्मजम् ॥ **6.93.17** ॥

ततो रामो महातेजा धनुरादाय वीर्यवान्।
प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष च ॥ **6.93.18** ॥

प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे।
नाधिजग्मुर्महाघोरा निर्दहन्तं शराग्निना॥ **6.93.19** ॥

कृतान्येव सुघोराणि रामेण रजनीचराः।
रणे रामस्य ददृशुः कर्माण्यसुकराणि ते॥ **6.93.20** ॥

चालयन्तं महासैन्यं विधमन्तं महारथान्।
ददृशुस्ते न वै रामं वातं वनगतं यथा॥ **6.93.21** ॥

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितम्।
बलं रामेण ददृशुर्न रामं शीघ्रकारिणम्॥ **6.93.22** ॥

प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम्।
इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः॥ **6.93.23** ॥

एष हन्ति गजानीकमेष हन्ति महारथान्।
एष हन्ति शरैस्तीक्ष्णैः पदातीन् वाजिभिः सह॥ **6.93.24** ॥

इति ते राक्षसाः सर्वे रामस्य सदृशान् रणे।
अन्योन्यं कुपिता जघ्नुः सादृश्याद् राघवस्य तु॥ **6.93.25** ॥

न ते ददृशिरे रामं दहन्तमपि वाहिनीम्।
मोहिताः परमास्त्रेण गान्धर्वेण महात्मना॥ **6.93.26** ॥

ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः।
पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे॥ **6.93.27** ॥

भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः।
अलातचक्रप्रतिमां ददृशुस्ते न राघवम्॥ **6.93.28** ॥

शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकम्।
ज्याघोषतलनिर्घोषं तेजोबुद्धिगुणप्रभम्॥ **6.93.29** ॥

दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान्।
ददृशू रामचक्रं तत् कालचक्रमिव प्रजाः॥ **6.93.30** ॥

अनीकं दशसाहस्रं रथानां वातरंहसाम्।
अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम्॥ **6.93.31** ॥

चतुर्दश सहस्राणि सारोहाणां च वाजिनाम्।
पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम्॥ **6.93.32** ॥

दिवसस्याष्टभागेन शरैरग्निशिखोपमैः।
हतान्येकेन रामेण रक्षसां कामरूपिणाम्॥ **6.93.33** ॥

ते हताश्वा हतरथाः शान्ता विमथितध्वजाः।
अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः॥ **6.93.34** ॥

हतैर्गजपदात्यश्वैस्तद् बभूव रणाजिरम्।
आक्रीडभूमिः क्रुद्धस्य रुद्रस्येव महात्मनः॥ **6.93.35** ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
साधु साध्विति रामस्य तत् कर्म समपूजयन्॥ **6.93.36** ॥

अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम्।
विभीषणं च धर्मात्मा हनूमन्तं च वानरम्॥ **6.93.37** ॥

जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च।
एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा॥ **6.93.38** ॥

निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा।
अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः॥ **6.93.39** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः॥